International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(5): 70-71
© 2018 IJSR
www.anantaajournal.com
Received: 16-07-2018
Accepted: 17-08-2018

**K Manogna**
Ph.D Student in Rashtriya Sanskrit Vidyapeetha Tirupati, Andhra Pradesh, India

**Correspondence**
**K Manogna**
Ph.D Student in Rashtriya Sanskrit Vidyapeetha Tirupati, Andhra Pradesh, India

# ज्ञानकर्मसमुच्चयः

**K Manogna**

**प्रस्तावना**

कर्मकाण्डिनः ज्ञानकर्मणोः समुच्चयं अभ्युपगच्छन्ति। तच्च न संभवति ज्ञानकर्मणोः विरोधात् इति अद्वैतवेदान्तिनां अभिप्रायः। समकालीनानुष्ठानस्य असंभवेऽपि क्रमेण ज्ञानकर्मणोरनुष्ठानं संभवति इति शांकरभाष्यानुसारेण मया अत्र प्रतिपाद्यते।

भारतीयदर्शनेषु चतुर्विधपुरुषार्थेषु परमपुरुषार्थः मोक्षः, 'न स पुनरावर्तते' इति श्रुत्या मुक्तस्य पुनरावृत्तिरहितत्वात्। तस्य मोक्षस्य प्राप्तेः उपायाः तत्तद्दर्शनाचार्यैः अनेकविधाः दर्शिताः -

१. तत्र वेदोक्तकर्मानुष्ठानं मोक्षसाधनं इति केचित्, 'कर्मणैव संसिद्धि आस्थिताः जनकादयः' इति, 'यजेत स्वर्गकामः' इति च एवमादिभ्यः श्रुतिभ्यः।
२. अन्ये निष्कामकर्मानुष्ठानेन, अर्थात् कर्मफलानभिसन्ध्या, मोक्षः प्राप्यते इति वदन्ति, 'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन' इत्युक्तेः।
३. तत्रापि 'भक्त्या मामभिजानाति' इति, 'मोक्षसाधनसामग्र्यां भक्तिरेव गरीयसि' इति च एवमादिभिः भगवद्भक्त्या मोक्षलाभः इति वदन्ति।
४. अपरे तु उपासनया तं प्राप्तुमिच्छन्ति, 'ध्यानेनात्मनि अनुपश्यन्ति केचिदात्मानमात्मनः' इत्यादिना उक्तत्वात्।
५. केचन अष्टांगयोगेन मोक्षः प्राप्यते इत्यपि वदन्ति।
६. अद्वैतवेदान्तिनस्तु आत्मज्ञानेन कैवल्यमिच्छन्ति, 'ज्ञानादेव तु कैवल्यं' इति श्रुतेः।

तत्राशंकते - केवलज्ञानादेव मोक्षप्राप्तिः, कर्मोपासनासहितेन ज्ञानेन वा? इति।

अन्धं तमः प्रविशन्ति ये अविद्यामुपसते।
ततो भूय इव ते तमो य उ विद्यायां रताः।
विद्यां च अविद्यां यस्तद्वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते।।

इत्येवमादिभ्यः श्रुतिभ्यः कर्मोपासनासहितेनैव मोक्षप्राप्तिः इति ज्ञानकर्मसमुच्चयं दर्शयन्ति।कर्मोपासनया चित्तशुद्धिः भवति। चित्तैकाग्रताद्वारा स्वरूपावगमे सति मोक्षप्राप्तिरिति समुच्चयवादिनां तात्पर्यम्।

तत्र अद्वैतवेदान्तिभिरुच्यते - एकेन पुरुषेन एकस्मिन् काले ज्ञानकर्मणोः समुच्चयानुष्ठानं नैव संभवति, तयोः तमःप्रकाशवत् विरुद्धस्वभावत्वात् इति। न च 'विद्यां चाविद्यां च' इति श्रुतेः ज्ञानकर्मसमुच्चये तात्पर्यमिति वाच्यम्। तत्र अविद्यापदस्य वेदविहितयज्ञानुष्ठाने, विद्यापदस्य च उपासनायां तात्पर्यत्वात्।

कर्म चतुर्विधं भवति - उत्पाद्यं, विकार्यं, संस्कार्यं, आप्यं चेति। मोक्षः न घटवद् उत्पाद्यम्। न दध्यादिवद् विकार्यम्। न व्रीह्यादिवद् संस्कार्यम्। नापि ग्रामादिवद् प्राप्यम्। किन्तु नित्यशुद्धबुद्धमुक्तस्वभावः मोक्षः। अतः मोक्षः न कर्मसाध्यः। उपास्यस्वरूपः उपासकः स्वयमिति न उपासना साधनकः मोक्षः। मोक्षस्तु आत्यन्तिकदुःखनिवृत्तिः परमानन्दप्राप्तिश्च। स च अज्ञाननिवृत्तिद्वारा भवितुमर्हति। अज्ञाननिवृत्तिस्तु ज्ञानादेव भवितुमर्हति, नान्यथा, अन्धकारस्य प्रकाशेन इव। अतः ज्ञानैकसाध्यः अज्ञाननिवृत्तिः। परमानन्दस्तु स्वरूपमेव मोक्षस्य।

पूर्वमुक्तं यत् एकेन पुरुषेन एकस्मिन् काले ज्ञानकर्मसमुच्चयः न भवितुमर्हतीत्यतः ज्ञानकर्मसमुच्चयः निराकृतः। किन्तु तयोः ज्ञानकर्मणोः क्रमसमुच्चये न कश्चित् विरोधः। एकेनैव पुरुषेन क्रमेण कर्मानुष्ठानेन चित्तशुद्धिं, उपासनया च चित्तैकाग्रतां संपाद्य आत्मज्ञानेन मोक्षः प्राप्तुं शक्यते। अत एवोक्तं –

कर्माणि चित्तशुद्ध्यर्थं ऐकाग्र्यार्थमुपासना।
मोक्षार्थं ब्रह्मविज्ञानमिति वेदान्तडिन्डिमः।। इति।।

उक्तं च एकस्मिन् समये ज्ञानकर्मणोः विरोधात् एकेन पुरुषेन उभयं न स्थातुमर्हति यथा फलपुष्पयोः एकस्मिन् समये एकस्मिन् वृक्षे एकस्यां शाखायां अवस्थितिः न शक्यते। तदुक्तं -

फलस्य कारणं पुष्पं फलं पुष्पविवर्जितम्।
ज्ञानस्य कारणं कर्म ज्ञानं कर्मविवर्जितम्।।इति।।

श्रुतिरपि ज्ञानस्यैव आन्तरिकं अन्यतममेकं मोक्षसाधनं विद्यते इत्यवदत् - 'तमेव विदित्वा अतिमृत्युमेति नान्यः पन्था विद्यते अयनाय' इति।

इत्थं कर्माद्यन्यसाधनानां आरादुपकारकत्वं, आत्मज्ञानस्य तु साक्षात्मोक्षसाधनत्वं सिद्धम्। तेन मोक्षाय ज्ञानकर्मणोः समसमुच्चयः निराकृतः, क्रमसमुच्चयः च साधितः। इत्यलं अतिविस्तरेन।

**मान्यता**

मम मार्गदर्शकेभ्यो गुरुभ्यो पितृभ्यो डा. के. बि. सुब्बरायुडुनामधेयेभ्यः सादरं कार्तज्ञं विनिवेदयामि।

**सहायकग्रन्थसूची**

1. शंकराचार्यः, ईशावास्योपनिषद् शांकरभाष्यम्।
2. शंकराचार्यः, श्रीमद्भगवद्गीता शांकरभाष्यम्।
3. वाचस्पति मिश्रः, भामती।